International Journal of Sanskrit Research 2021; 7(6): 233-236

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 233-236
© 2021 IJSR
www.anantaajournal.com
Received: 18-09-2021
Accepted: 25-10-2021

**Sumanta Bhaskar**
Ph.D., Department of Vyakarana, Scholar of National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**Sumanta Bhaskar**
Ph.D., Department of Vyakarana, Scholar of National Sanskrit University, Tirupati, Andhra Pradesh, India

# महाभाष्येऽन्योन्याश्रयदोषमाश्रित्य तद्धितश्चासर्वविभक्तिः इति सूत्रे अविभक्तिपदविमर्शः।

**Sumanta Bhaskar**

**प्रस्तावनाः**

वेदानां रक्षकत्वात्, वेदार्थावबोधने सहायकत्वात् प्रकृतिप्रत्ययोपदेशपुरस्सरपदस्वरूपप्रतिष्ठापकत्वादर्थनिर्णयनकृतसाधनेषु अन्यतमसाधनत्वेन प्रयुक्तत्वात् व्याकरणं नामाङ्गं नितान्तमेव महनीयं श्रेष्ठम् अपेक्षितञ्च। वेदस्य षडङ्गेषु व्याकरणस्यैव "मुखं व्याकरणं स्मृतम्" इति मुख्यत्वात् व्याकरणं मुखत्वेन स्मृतमाचार्यैः। मुख्यत्वात् अवश्यम् अध्येयं व्याकरणमिति मत्वा उक्तवन्तः महाभाष्यकाराः पस्पशाह्निके "प्रधानं च षट्सु अङ्गेषु व्याकरणम्, प्रधाने च कृतो यत्नः फलवान् भवति" इति। न केवलं वेदरक्षणाय अपि तु लोकेऽपि अस्ति प्रयोजनं व्याकरणस्य। इह खलु लोके व्यावहारनिर्वहणार्थं भाषैव जुषते प्रधानभावम्। भाषैव लोकव्यवहारं प्रवर्तयतीत्यर्थः।तथा च महामुनिना भगवता पतञ्जलिना हि पाणिनीयसूत्राणं या अत्यन्तोत्कृष्टा व्यवहारोपयोगिनी व्याख्या कृता सा संस्कृत जगति 'व्याकरणमहाभाष्य' नाम्ना व्यपदिश्यते। अत्र व्याकरणस्य शुष्कविषया एवंविधया सरसया सरलया भाषयोपस्थापिताः,तान् मुक्तकण्ठं प्रशंसन्ति सर्वे विद्वांसः। अस्य रचना सौष्ठवं संस्कृतवाङ्मयेऽपूर्वमस्ति मञ्जुलम्। अपितु समस्ते संस्कृतवाङ्मये इदमेकमद्भुतं प्रामाणिकं ग्रन्थरत्नमस्ति। सर्वे वैयाकरणा एतस्य समक्षं नतमस्तकाः भवन्ति। महाभाष्ये हि प्रायः पाणिनीयसूत्राणां प्रत्येकपदानां विवेचनं कृतं विद्यते। वैयाकरणा हि सूत्रवार्तिकभाष्येषु परस्परविरोधे महाभाष्यमेव प्रामाणिकं मन्यन्ते। तथा हि महाभाष्यस्य प्रदीपे कैयटेनोक्तम् "यथोत्तरं हि मुनित्रयस्य प्रामाण्यं" इति।

प्रदीपोद्योतटीकायाञ्च नागेशेनोक्तम्- 'यथोत्तरं मुनीनां प्रामाण्यम्' इति। अद्यत्वे पाणिनीयव्याकरणस्य यादृशी प्रतिष्ठा यथा वा शास्त्रेषु मुख्यं स्थानं गण्यते, सोऽयं भगवतः पाणिनेः, कात्यायनस्य, पतञ्जलेः च प्रभावः। पतञ्जलिकृतं महाभाष्यं न केवलं व्याकरणस्यैव निबन्धः, किन्तु अत्र सर्वे ज्ञातव्याः विषयाः, लौकिका व्यवहाराः प्राक्तना इतिहासाः आवश्यकाः धर्माः दर्शनानां सिद्धान्ताः गूढतानि विज्ञातानि च तत्र तत्र सपरिकरं विवेचितानि। वैज्ञानिका यमाकार्षणसिद्धान्तं न्युटनेनाऽविष्कृतं मन्यन्ते, स तु भगवता पतञ्जलिना 'स्थानेऽन्तरतमः' इति सूत्रभाष्ये बहुपूर्वमेव समुद्घोषितं विद्यते।

**अन्योन्याश्रयदोषमाश्रित्याविभक्तिपदविमर्शः**

अस्मिंश्च प्रबन्धे महाभाष्ये नवमाह्निकानुसारेण तद्धितश्चासर्वविभक्तिः इति सूत्रे विद्यमानस्य अन्योन्याश्रयदोषस्य उद्धरणं तथा तत्परिस्कारश्च समालोच्यते। यदि तद्धितश्चासर्वविभक्तिः इत्यस्य स्थाने अविभक्तिः अव्ययम् अर्थात् विभक्तिरहितस्य शब्दस्य अव्ययसंज्ञा स्यात् चेत् किं भवेत् इति आक्षेपे सति ग्रन्थकारः कथयति- अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः इति।

अर्थात् अविभक्तौ अर्थात् अविभक्तिरव्ययम् इत्येव सूत्रं क्रियते चेत् अन्योन्याश्रयदोषेण अव्ययसंज्ञा दुषिता भवति।

तद्यथा प्रदीपे उक्तम् अव्ययत्वादविभक्तित्वमविभक्तित्वादव्ययत्वमिति दोषः। अर्थात् विभक्तिकत्वस्य स्वाभाविकत्वेऽव्ययादाप्सुपः इत्यस्य वैयर्थ्यप्रसङ्गादिति भावः। अतः अन्योन्याश्रयदोषकारणात् तथा इष्टसिद्धिः न भवति।

का तावत् इतरेतराश्रयता इति प्रश्नः समायाति। अस्य आक्षेपस्य उत्तरं प्रयच्छति आचार्यः पचञ्जलिः यत्- सत्यविभक्तिकत्वे संज्ञया भवितव्यम्, संज्ञया चाऽविभक्तित्वं भाव्यते, तदेतदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते इति भाष्यम्। अस्य अर्थस्तावत् भवति विभक्तिरहितशब्दस्य अव्ययसंज्ञा भवतव्या तथा च अव्ययसंज्ञया अविभक्तित्वम् अर्थात् विभक्तेर्लोपः अव्ययादाप्सुपः इति सूत्रेण भवति। भावः एवं भवति यत् यदा कोऽपि शब्दः अविभक्तिकः विभक्तिरहितो वा भवति तदा अव्ययसंज्ञा सम्भवति। ततश्च यदा अव्ययसंज्ञा सम्भवति तदैव विभक्तेर्लोपः भवति। इत्येवं रूपेण परस्परम् आधारीकृत्य तिष्ठति। अतः प्रकृतस्थले अन्योन्याश्रयदोषः सम्भवति। अन्योन्याश्रयस्थले च कार्याणि न प्रकल्प्यन्ते।

सम्प्रति पुनः न्यासान्तरदूषकवार्तिकम् उच्यते भाष्ये यत्- अलिङ्गमसंख्यमिति वा इति। अस्यार्थो भवति अथवा अलिङ्गं लिङ्गरहितं वा तथा असंख्यं संख्यारहितं वा (शब्दः) अव्ययं भवति इत्येवं वक्तव्यं भवति। वस्तुतः अविभक्तेः स्थाने अलिङ्गमसंख्यमव्ययम् इत्येवं सूत्रं करणीयं भवति।

तथा सूत्रं क्रियते चेदपि अन्योन्याश्रयदोषः सम्भवति। कथञ्च अन्योन्याश्रयता दोषः सम्भवति? इत्येवं प्रश्ने सति आचार्यः उत्तरति यत् - यदा लिङ्गरहितं तथा संख्यारहितं भवति तदा अव्ययसंज्ञा स्यात्। ततश्च अव्ययसंज्ञाद्वारैव अव्ययादाप्सुपः इति सूत्रेण स्वादिनां लोपे लिङ्गरहितं तथा संख्यारहितं निर्मीयते। अर्थात् लिङ्गस्य तथा संख्यायाः अभावः अव्ययसंज्ञायां, तथा च अव्ययसंज्ञा लिङ्गसंज्ञायां संख्यासंज्ञायां च कारणं भवति। इत्येवं रूपेण परस्पराश्रितत्वात् अन्योन्याश्रयदोषः प्रकृतस्थले सङ्गच्छते। अन्योन्याश्रयाणि च कार्याणि न् प्रकल्प्यन्ते। अलिङ्गता लिङ्गरहितो वा तथा असंख्यता संख्यारहितो वा केनापि वचनेन न साध्यते अर्थात् द्वयोः कार्ययोः सिद्ध्यर्थं कस्यापि वचनस्य आवश्यकता नास्ति। एवम् आशये सति उक्तं स्वाभाविकमेतत् इति। यथा समानं प्रयत्नवान् बालकः तथा एकः समानम् अध्ययनवान् बालकः वर्तते। इत्यनयोर्मध्ये कोऽपि अर्थेण सह युक्तः सन् सफलो भवति तथा चान्यः सफलो न भवति। अर्थात् कस्यचित् तादृशं ज्ञानं भवति यत् कस्यापि न भवति। तत्र अध्यापकाः किं कर्तुं शक्नुवन्ति। एतत्तु स्वभावतः सिद्धो भवति। एवं प्रकारेण अलिङ्गता तथा असंख्यतापि शब्देषु स्वाभाविकतया सिद्धः भवति। अतः इतरेतराश्रयदोषस्य प्रसङ्गता न भवति।

तथा चेत् अलिङ्गमसङ्ख्यमव्ययम् इति सूत्रं वक्तव्यं भवति इति पूर्वपक्षिणः आक्षेपात्मकं मतं वर्तते। ततश्च सिद्धान्तिभिः सिद्धान्तमतम् उक्तं सिद्धं तु पाठात् इति भाष्यवार्तिकम्। अस्य वार्तकस्य अर्थः भवति यत् अथवा पाठेनैव अव्ययसंज्ञा सिद्धा भवति। तच्च पाठः कथंप्रकारेण करणीयः भवति इत्याक्षेपे सति उक्तं तसिलादयः प्राक् पाशपः। शस्प्रभृतयः प्राक् समासान्तेभ्यः। मान्तः तसिवती। कृत्वोऽर्थः। नानाञाविति [1]। अर्थात् "पञ्चम्यास्तसिल्" [2] इति सूत्रेण विहितात् तसिल्प्रत्ययात् याप्ये पाशप् इति सूत्रे पाशपः पूर्वं यावत् "बह्वल्पार्थाच्छस् कारकादन्यतरस्याम्" इति सूत्रेण विहितात् शसादि-प्रत्ययात् "समासान्ताः" [3] इति सूत्रेण विहितात् समासान्तप्रत्ययात् पूर्वं यावत्। "किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे" [4] इति सूत्रेण विहितः आम् प्रत्ययः तथा "अमुच्च्छन्दसि" [5] इति सूत्रेण विहितः अम्-प्रत्ययः यश्च मान्तः प्रत्ययो वर्तते। "प्रतियोगे पञ्चम्यास्तसिः" [6] इति सूत्रेण विहितः तस्प्रत्ययः तथा च "तेन तुल्यं क्रिया चेद्वतिः" इति सूत्रेण तथा च "तत्र तस्यैव" "तदर्हम्" [7] इति सूत्रैः विहितः वत्प्रत्ययः तथा च संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् द्वित्रिचतुर्भ्यः सुच् तथा विभाषा वहोर्धाऽविप्रकृष्टकाले इति सूत्रेण च कृत्वसुजर्थवन्तः कृत्वसुच् सुच् धा प्रत्ययाः विहिताः। विनञ्भ्यां नानाञौ नसह इति सूत्रेण विहितः नाप्रत्ययः तथा च नाञ्प्रत्ययः। एते तद्धितप्रत्ययाः अन्ते येषां ते तद्धितान्ताः शब्दाः उच्यन्ते। तेषां तद्धितान्तानां शब्दानां अव्ययसंज्ञा भवति। थाल् प्रत्ययः लौकिकः तथा वैदिकः इति कृत्वा उभयविधावपि प्रकारकौ शब्दौ स्वीकृतौ वर्तेते। अतः द्वयोरपि प्रकारयोः शब्दयोः अव्ययत्वं स्वीक्रियते। अथवा अविभक्तिकः शब्दोऽव्ययं भवति। अतः अविभक्तिरव्ययम् [8] इति सूत्रे वर्णितं वर्तते।

पुनश्च आचार्यः आक्षेपं प्रदर्शयति यत् ननु चोक्तम् अविभक्तावितरेतराश्रयत्वादप्रसिद्धिः इति। अर्थात् अविभक्तिरव्ययमिति उच्यते चेत् इतरेतराश्रयदोषः सम्पद्यते। अतः अव्ययसंज्ञापि न भवति। तद्वारयति-

नैषः दोषः। यतो हि भाष्ये उक्तम्- यद्यपि तावद्वैयाकरणा विभक्तिलोपमारभमाणा अविभक्तिकाञ्छब्दान् प्रयुञ्जते। ये त्वेते वैयाकरणेभ्योऽन्ये मनुष्या कथं तेऽविभक्तिकाञ्छब्दान्प्रयुञ्जते इति आक्षेपः। अभिज्ञाश्च पुनर्लौकिकाः एकत्वादीनामर्थानाम्। अतश्चाभिज्ञाः। अन्येन हि एकेन मूल्येन एकां गां क्रीणन्ति। अन्येन द्वौ तथा अन्येन त्रीन् इति भाष्ये उक्तम्। अभिज्ञाश्च न च प्रयुञ्जते। तदेतदेवं संदृश्यताम् अर्थरूपमैवैतदेवंजातीयकं येनात्र विभक्तिर्न भवतीति भाष्यम्। अस्य अर्थो भवति यत्

एतदितरेतराश्रयदोषस्य आक्षेपवतां पूर्वपक्षीणां कृते एतत् प्रष्टव्यं भवति यत्- यद्यपि विभक्तिलोपस्य अव्ययादाप्सुपः इत्यादि-सूत्रात् आरम्भं कर्तारः वैयाकरणाः विभक्तिरहितशब्दानां प्रयोगं कुर्वन्ति। अर्थात् वैयाकरणानां लोपविधायकशास्त्रस्य ज्ञानं वर्तते। तदैव लोपशब्दस्य प्रयोगं कुर्वन्ति। परन्तु वैयाकरणेभ्यः भिन्नः यः सामान्यः मनुष्यः विभक्तिहीनानां शब्दानां प्रयोगः कथं करणीयः इति तु सः न जानाति। यतो हि ते लोपविधायकं सुत्रमेव न जानाति। अतः ते अवैयाकरणा अपि लौकिकम् एकत्वादि-अर्थान् ज्ञानवन्तः भवन्ति। निश्चितरूपेण ते एकत्वादीन् अर्थान् ज्ञातुं शक्नुवन्ति। किन्तु तदर्थाणां बोधिकानां विभक्तीनां अव्ययशब्देषु प्रयोगो न भवति। तासां ज्ञानस्य प्रमाणं भवति यत् ते

एकेन मूल्येन एकां गां क्रीणाति ततश्च अन्येन द्वितीयेन मूल्येन द्वितीयां गां क्रीणाति तथा च तृतीयेन मूल्येण तृतीयां गां क्रीणाति एतेन स्पष्टं भवति यत् एतेषाम् एकत्वादीनाम् अर्थानां पूर्णतया ज्ञानं भवति। तथापि अव्ययसंज्ञकशब्देन एकत्वादिबोधकविभक्तीनां प्रयोगः न भवति। अतः एतत् एवंप्रकारेण ज्ञातव्यं भवति यत् एतत्पदार्थस्य स्वरूपमेव एवं भवति येन कारणेन विभक्तिः न भवति। अतः विभक्तीनाम् अप्रयोगः शब्दस्वभावस्य उपरि तिष्ठति। अतः व्याकरणशास्त्रस्य कारणता अत्र न ज्ञातव्या। व्याकरणशास्त्रस्य प्रणयनात् पूर्वमपि एतत्प्रकारकशब्देषु विभक्तीनां प्रयोगः न भवति स्म।

एतदेव वचनम् अव्ययविषये एवंप्रकारेण ज्ञातव्यं भवति यत् केचन अव्ययसंज्ञकाः शब्दाः विभक्त्यर्थप्रधानाः भवन्ति तथा च केचन क्रियार्थप्रधाना भवन्ति। यथा उच्चैः नीचैः इत्येतेषु विभक्त्यर्थे सप्तम्यर्थे अधिकरणतायाः प्राधान्यं वर्तते। हिरुक् पृथक् इत्येते च क्रियाप्रधानाः वर्तन्ते। क्रियाविशेषणत्वात् क्रियार्थस्य प्रधानता वर्तते। इत्येवंप्रकारेण तदि्धतप्रत्ययोऽपि विभक्त्यर्थप्रधानो भवति। अर्थात् तेषु सप्तम्यादिविभक्तिषु अधिकरणाद्यर्थस्य प्रधानता विद्यते। केचन क्रियाप्रधानाः वर्तन्ते अर्थात् क्रियार्थस्य प्राधान्यं केषाञ्चन विद्यते। यथा यत्र यत्र इति विभक्त्यर्थप्रधानं वर्तते। अत्र तत्र इत्यर्थेषु अधिकरणार्थः प्रतीयते। तथा विना नाना इत्येतेषां क्रियाप्राधान्यम् अस्ति। यतो हि क्रियाविशेषणतायाः प्रतीतिरत्र भवति। अत्र च भिन्नार्थस्य प्रतीतिर्भवति। किन्तु अधिकरणत्वादिविभक्त्यर्थस्य तथा भिन्नत्वादिक्रियार्थस्य न तु लिङ्गेन सह सम्बन्धोऽस्ति न वा संख्यया सह सम्बन्धो वर्तते। एतत्तद्धितप्रत्ययानाम् अर्थेषु यद्यपि विभक्त्यर्थस्य तथा क्रियार्थस्य प्रधानता प्रतीयते। तथापि लिङ्गस्य तथा संख्यायाः योगश्च न भवति। अतः अविभक्तिः अलिङ्गम् असंख्यम् इति एवमपि सूत्रं कर्तुं शक्यते। केषुचित् अव्ययेषु द्रव्यार्थस्यापि प्रधानता दृश्यते।

**पाणिनिकृतसूत्रस्य समर्थनम्**

वस्तुतस्तु तद्धितश्चासर्वविभक्तिः इति सूत्रे असर्वविभक्तिः इत्येवं कथ्यते चेदपि कोऽपि दोषः नास्ति इति सिद्धान्तिना उक्ते सति कथयति पूर्वपक्षिः कथम् इत्येवं रूपेण आक्षेपं प्रदर्शयति। तदुत्तरं वक्ति आचार्यः पतञ्जलिः वर्तमानसमये सूत्रकारपाणिनिना बहु वृहत् सूत्रं रचयामास एकार्थे एकवचनं द्व्यर्थे च द्विवचनं तथा च बहुष्वर्थेषु बहुवचनम् इति। तद्यथा द्व्येकयोर्द्विवचनैकवचने इति तथा च बहुषु बहुवचनमिति सूत्रम्। तदेव भाष्ये उद्योते चोक्तम् अद्यत्वे अतिबहु क्रियते- एकस्मिन्नेव एकवचनं, द्वयोर्द्विवचनं बहुषु बहुवचनम् इति। सूत्रारम्भकाले अद्यत्वे इत्यस्य अर्थः। पूर्वं हि न्यासान्तराश्रयेण सूत्रं प्रत्याख्यातम्। एकस्मिन् इत्यपनीयैवचनमिति सूत्रं कर्तव्यम्। ततो द्विबहोर्द्विवचनबहुवचने इत्येवं कर्तव्यम्। तेन द्वित्वबहुत्वयोर्द्वचनबहुवचने भविष्यतः। एकवचनं त्वेकस्मिन्नपि भविष्यत्यलिङ्गासङ्ख्येभ्योऽव्ययेभ्यश्च। ननु कर्मणि द्वितीयेत्यादिना कर्मादिषु द्वितीयादीनां नियतत्वात् कथमेकवचनमव्ययेभ्यः स्यात्। अतः नैषः दोषः। एतदर्थमेकवचनमित्येतत् क्रियते अप्राप्तप्रापनार्थम्। तेन कर्माद्यभावेऽपि भवति। द्वित्वबहुत्वयोस्तु प्राप्तं द्विवचनबहुवचनाभ्यां बाध्यते।

तर्हि कथं कर्तव्यं सूत्रं समाधानं वा इति आक्षेपे सति उक्तम् एकवचनम् उत्सर्गतः प्रतीयते। अर्थात् सामान्यतया एकवचनं भविष्यति। तद्यथा द्वित्वबह्वोरर्थयोः द्विवचनबहुवचने बाधके भविष्यतः। अर्थात् एकवचनस्य द्वौ तथा बहौ अर्थे क्रमशः द्विवचनं तथा बहुवचनं बाधकं भवति। अतः उक्तं भाष्ये एकवचनमुत्सर्गतः प्रतीयते इति।

अस्य विचारस्य विमर्शत्वेन कथ्यते चेत् एवं भवति यत् भाष्यकारेण पाणिनिकृतप्रस्तुतसूत्रस्य तु समर्थनं क्रियते किन्तु वचनसम्बन्धिसूत्रेषु परिवर्तनं ज्ञापितं विद्यते। एतदनुसारेण एकवचनमिति सामान्यं सूत्रम् अस्ति। यच्च प्रत्येकशब्दात् एकवचनस्य विधानं भवति। तच्च संख्यार्थस्य प्रतीतिर्भवति अथवा न। अधुना यदि द्वयोर्थयोः अथवा बह्वनामर्थानां प्रतीतर्भवति तर्हि अस्य बाधं कृत्वा क्रमशः द्विवचनं तथा बहुवचनं कर्तव्यं भवति। अतः एकवचनस्य प्रयोगस्तु सर्वत्रैव प्राप्यते। यतो हि विभक्ति इतीयं संज्ञा तु एकवचनं द्विवचनं बहुवचनम् इति त्रयमपि मिलित्वा व्यवह्रियते। एतवचने इदम् सम्पूर्णं न भवति। अतः एतच्छब्दरूपेषु असर्वा विभक्तिः यस्मात् सः- असर्वविभक्तिः अयं विग्रहः घटितो भवति। तथा च अव्ययसंज्ञा भवति। फलस्वरूपम् एकवचनस्य लुक् भवति। ततश्च तद्धितश्चासर्वविभक्तिः इति सूत्रं समीचीनं तिष्ठति।

अस्य सम्पूर्णस्य भाव एवं भवति यत्-

ननु अत्रेदं भाष्यम्- यदि पुनः अविभक्तिः शब्दोऽव्ययसंज्ञो भवतीत्युच्यते। तद्धितश्चासर्वविभक्तिः इति सूत्रे तद्धितपदस्थाने शब्दपदं प्रक्षिप्यते। सर्वपदं त्यज्यते। एवञ्च शब्दश्चाविभक्तिः इति न्यासः क्रियते। एवञ्च विना नाना इत्यादौ न दोष इति चेत् –

उच्यते। अविभक्तावितरेतराश्रयत्वात् अप्रसिद्धिः [9] इत्यत्र अविभक्ताविति न्यासे इतरेतराश्रयदोषात् अव्ययसंज्ञायाः अप्रसिद्धिः। का इतरेतराश्रयता? सत्यविभक्तित्वे संज्ञया भवितव्यम्, संज्ञया च अविभक्तित्वं भाव्यते। तदितरेतराश्रयं भवति। इतरेताश्रयाणि च कार्याणि न प्रकल्पन्ते [10]। एवमलिङ्गमसंख्यमव्ययसंज्ञं भवतीति न्यासोऽप्यन्योन्याश्रयदोषः। सिद्धं तु पाठात् [11]। पाठाद्वा सिद्धमेतत् [12]। कथं पाठः कर्तव्य। तसिलादयं प्राक् पाशपः। शस्प्रभृतयः प्राक्समासान्तेभ्यः। मान्तः। तसिवती। कृत्वोऽर्थः। नानाञाविति [13]।

अथवा पुनरस्तु- अविभक्तिः शब्दोऽव्ययसंज्ञो भवत्येवेति भाष्यम्। वा उक्तान्योन्याश्रयदोषोऽपि परिहृतः। एवञ्च अविभक्तिः इति न्यासः अलिङ्गमसङ्ख्यमिति न्यासोऽप्यदुष्टः इति सिद्धम्।

अन्ततः तद्धितश्चासर्वविभक्तिरिति न्यासोऽपि सङ्गच्छते इति निरूपितम् इति।

अस्य सामान्यतः सूत्रार्थः उदाहरणञ्च प्रदश्यते-

तद्धितः च असर्वविभक्तिरिति पदविभागः। असर्वा विभक्तिः यस्य सः असर्वविभक्तिरिति बहुव्रीहिसमासः। सर्वशब्दोऽत्र सर्वः परो दग्ध इतिवत् अवयवकात्स्न्ये वर्तते।

**अलिङ्गमसङ्ख्यमिति वा[14]**

अविभक्तिरिति न्यासे इतरेतराश्रयत्वात् अव्ययसंज्ञा अप्रसिद्धिः स्यात्। अव्ययत्वात् अविभक्तित्वम्, अविभक्तित्वादव्ययत्वमिति अन्योन्याश्रयदोषः। तदेवोक्तं भाष्ये - का इतरेतराश्रयता इति सत्यविभक्तित्वे संज्ञया भवितव्यम्। संज्ञयाच अविभक्तित्वं भाव्यते। तदितरेतराश्रयं भवति। इतरेतराश्रयाणि चि कार्याणि न प्रकल्पन्ते इति। अतः अविभक्तिरव्ययमिति न्यासो न सङ्गच्छते।

अलिङ्गमसङ्ख्यमिति वा इत्यत्र वार्तिके ननु अलिङ्गमसंख्यमव्ययसंज्ञं भवतीत्युच्यते। विना नानादिशब्दानाम् अलिङ्गासंख्यत्वादव्ययत्वं सिद्धमिति चेदुच्यते। अस्मिन्नपि लक्षणे पूर्ववदेव अन्योऽन्याश्रयदोषसद्भावात् नैतदपि अव्ययलक्षणं भवितुमर्हति। अत्रेदं भाष्यम् एवमपि इतरेतराश्रयमेव। का इतरेतराश्रयता? सत्यलिङ्गासंख्यत्वे संज्ञया भवितव्यम्। संज्ञया च अलिङ्गासंख्यत्वं भाव्यते। तदितरेतराश्रयं भवति। इतरेतराश्रयाणि च कार्याणि न प्रकल्पन्ते इति [15] ।

अविभक्तिरव्ययमिति लक्षणस्य दूषितत्वात्, अत्रापि तदेव दूषणमिति प्रदर्शनार्थः वार्तिके वा शब्दः प्रयुक्तः। यथा अविभक्तिरव्ययमिति न्यासे अन्योऽन्याश्रयदोषः प्रसक्तः एवमेव अलिङ्गमसंख्यमव्ययमिति न्यासेऽपि अन्योऽन्याश्रयदोषः प्रसज्यते इति अयमपि न्यासः दुष्ट एवेति भावः।

**अलिङ्गमसङ्ख्यमिति न्यासः अदुष्टः[16]**

वस्तुतः अलिङ्गमसङ्ख्यमिति न्यासे अन्योऽन्याश्रयदोषो नास्तीति भाष्ये प्रतिपादितम्। तथाहि - नेदं वाचनिकम् अलिङ्गता असङ्ख्यता च। किन्तु स्वाभाविकमेतत्। तद्यथा समानमीहमानानामधीयानानाञ्च केचिदर्थैः युज्यन्ते अपरे न।

**सिद्धं तु पाठात्[17]**

तद्धतश्चासर्वविभक्तिः इति सूत्रस्थाने अलिङ्गमसङ्ख्यमिति न्यासे अन्योन्याश्रयदोषो नास्ति। अतः स न्यासः निर्दुष्टः। विना नाना इत्यादौ च अव्ययसंज्ञासिद्धिर्भवति इति प्रतिपादितम्। तर्त्तहि वक्तव्यम् – अलिङ्गमसख्यमिति आशङ्क्य न वक्तव्यम् इति समाहितं सिद्धं तु पाठात् इति वार्तिकेन।

सिद्धं तु पाठात् ( वार्तिकम् )

पाठाद्वा सिद्धमेतत्। कथं पाठः कर्तव्यः इति चेदुच्यते।

1. तसिलादयः प्राक् प्राशपः। पञ्चम्यास्तसिल् इत्यारभ्य याप्ये पाशप् इति पर्यन्तम्।
2. शस्प्रभृतयः प्राक् समासान्तेभ्यः। बह्वल्पदार्थाच्छस् इत्यारभ्य समासान्ताः इति सूत्रात् प्राक्।
3. मान्तः। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे इति आम्। अमु च च्छन्दसि इति अम्।
4. तसिवती। प्रतियोगे पञ्चम्यास्तसिः इति तसिश्च इति च तसिः। तेन तुल्यं क्रिया चेद्वतिः इति वतिः।

**सन्दर्भः**


1. महाभाष्यम्
2. पा. सू
3. पा. सू
4. पा. सू
5. पा. सू
6. पा. सू
7. पा. सू
8. पा. सू
9. म. भा. वा
10. महाभाष्यम्
11. म. भा. वा
12. म. भा वचनम्
13. महाभाष्यम्
14. म. भा. वा
15. म. भा
16. म. भा. वा
17. म. भा. वा